


श्रीगणेशायनमः ॥ सूतउवाच ॥ एकदातु
खमासीनौपार्वतीपरमेश्वरौ ॥ अन्योन्या
श्लिष्टहृद्बाहुलोकरक्षणतत्परौ ॥१॥ इंद्रा
दिलोकपालेभ्यःसेवितौचपरात्परौ ॥ पार्व
तीपरिपप्रछतदाधर्माननुक्रमात् ॥२॥

पार्वत्युवाच ॥ मन्नाथजगतांनाथसर्व
यज्ञफलप्रद ॥ त्वत्प्रसादान्मयाज्ञातंधर्म
शास्त्रमनुत्तमं ॥ ३ प्रायश्चित्तंतुपापानां
कृतंसर्वमशेषतः ॥ ब्रह्महत्यादिपापानां
निष्कृतिंवक्तुमर्हसि ४ ॥ श्रीमहादेव उ० ॥ श्र

ण्डुदेविप्रवक्ष्यामिगुह्याद्गुह्यतरंमहत् ॥ स
नत्कुमारविघ्नेशसंवादंपापनाशनं ॥५॥ उ
पविष्टंगणाध्यक्षमेकांतेप्रणिपत्यसः ॥
सनत्कुमारःपप्रच्छसर्वधर्मविदांवरं ॥६॥
सनत्कुमार उवाच भगवन्सर्वधर्मज्ञसर्वतत्वविशा

रद॥ द्विजहत्याहरंधर्मंवक्तुमर्हसिमेप्रभो
७॥भवद्विनास्यधर्मस्यवक्तानास्तिजगत्त्रये
विनायकउवाच॥ साधुपृष्टंत्वयाब्रह्मन्सर्वं
लोकोपकारकं॥८॥ मयाचिरंकृतंकर्मस्मा
रितंभवतानघ॥ पुराहंगजरूपेणजातःप

र्वतसन्निभः ९ मत्तोहृक्षान्समुत्पाद्यमु
निर्हिंसांसमारभं तदामयामुनिगणा
हिंसिताबहवोबलात् १० हाहाकारोम
हानासीद्ब्राह्मणानांसमंततः तदाहत्या
सहस्रेणवेष्टितःपतितोस्म्यहं ११ निःसं

स॰

३

त्वं मत्तनुल्यं मां वीक्ष्य देवः पिता मम ॥ आ
राध्यं जगतामीशं रामं सर्वहृदि स्थितं ॥ १२ ॥
प्रत्यक्षमकरोद्देवं मद्धेनो रघुनंदनं ॥ तदाप्रो
वाच भगवान् श्रीरामः पितरं मम ॥ १३ ॥ श्री
रामउवाच प्रसन्नोस्मि महादेव किं मां प्रार्थ

यमेविभो ॥ दास्यामियदभीष्टंनेत्रिषुलो
केषुदुर्लभं ॥ १४ ॥ श्रीमहादेवउवाच ॥ द्विजह
स्यासमाविष्टमुमापुत्रमिमंप्रभो ॥ निःपा
पंकुरुदेवेशयद्यस्तिमयितेदया ॥ १५ ॥ इत्यु
क्तेनतदातेनदययावीक्षितोस्म्यहं ॥ तस्म

सनत्कुमार उवाच ॥ धन्योस्म्यनुग्रहीतो
स्मि कृतार्थोस्मि गणाधिप ॥ त्वत्प्रसादा
न्मयाधीतं रामनामसहस्रकं ॥ २१ ॥ शौनक
उवाच ॥ इति विज्ञाप्य देवेशं परिक्रम्य
प्रणम्य च ॥ तदादि सनतं जप्त्वा स्तोत्रमेत

ह्रानने ॥२२॥ अवापपरमांसिद्धिंपुण्यां स.

पापविवर्जितां॥ पार्वत्युवाच ॥ श्रोतुमिच्छा

मिदेवेशानदहंसर्वकामदं॥२३॥ नाम्ना

सहस्त्ररामस्यब्रह्मिहियद्यक्तिमेदया॥ श्रीं ६

कउवाच अथवक्ष्याम्मिभोदेविरामनाम

सहस्त्रकं ॥२४॥ शृणुष्वैकमनाःस्तोत्रंगु
ह्याद्गुह्यतरंमहत् ॥ ऋषिर्विनायकश्चास्य
गायत्रीछंदएवच ॥२५॥ परब्रह्मात्मकोरा
मोदेवताशुभदर्शने ॥ अस्यश्रीरामसह
स्त्रनामस्तोत्रमंत्रस्य ॥ श्रीमहादेवऋषिः

अनुष्टुप्छंदः ॥ श्रीरामः परमात्मादेवता
महाविष्णुरितिबीजं ॥ गुणभृन्निर्गुणोम
हानितिशक्तिः सच्चिदानंदविग्रहइति
कीलकं ॥ श्रीरामचंद्रप्रीत्यर्थेजपेविनियो
गः ॥ श्रीरामचंद्रायअंगु० ॥ सीतापतयेत०

स० ७

रघुनाथायमध्य॰ ॥ भरताग्रजायअ॰ ॥ दा
शरथात्मजायक॰ ॥ हनुमत्प्रभवेकरतलक
रपृ॰ ॥ एवं हृदया दि श्रीरामचंद्रायहृदयाय॰
सीतापतयेशिरसे॰ ॥ रघुनाथायशिखायै॰
भरताग्रजायकवचाय॰ ॥ दशरथात्मजायने

न्त्रयाय॥ हनुमत्प्रभवेष्यन्त्राय॥ अ
ध्या॥ ध्यायेदाजानुबाहुंधृतशरधनु
षंबद्धपद्मासनस्थंपीतंवासोवसानंनव
कमलदलस्पर्धिनेत्रंप्रसन्नंवामांकारू
ढसीतामुखकमलमिलल्लोचनंनीरदा

स॰ ४

भंन्यान्नालंकारदीप्तंदधतमुरुजटामंड
लंरामचंद्रं ॥ २६ ॥ सौवर्णेपंउपेदिव्येपुष्प
केतुविराजिते ॥ मूलेकल्पतरोःस्वर्णपी
ठेसिंहाष्टसंयुते ॥ २७ ॥ मृदुश्लक्ष्णतरेत
त्रजानक्यासहसंस्थितं ॥ रामंनीलोत्प

लक्ष्यामंद्विभुजंपीतवाससं ॥२८॥ स्मित
वक्त्रंसुखासीनंपद्मपत्रनिभेक्षणं ॥ की
रीटहारकेयूरकुंडलैःकटकादिभिः॥
२९॥ बिभ्राजमानंविज्ञानमुद्रंवीरासने
स्थितं ॥ स्पृशंतंस्तनयोरग्रेजानक्याःस

मपाणिना ॥ ३० ॥ वशिष्ठवामदेवाद्यैःसे
वितंलक्ष्मणादिभिः ॥ अयोध्यानगरेरम्ये
अभिषिक्तंरघुद्वहं ॥ ३१ ॥ एवंध्यात्वाजपे
न्मंत्रंरामनामसहस्रकं ॥ हत्याकोटियुतो
वापिमुच्यतेनात्रसंशयः ॥ ३२ ॥ रामःश्री

मान्महाविष्णुर्जिष्णुर्देवहितावहः ॥ तत्व
त्मातारकंब्रह्मशाश्वतः सर्वसिद्धिदः ॥ ३३
राजीवलोचनः श्रीमान्श्रीरामोरघुपुंग
वः ॥ रामभद्रः सदाचारोराजेंद्रोजानकीप
तिः ॥ ३४ ॥ अग्रगण्योवरेण्यश्चवरदः पर

मेश्वरः॥ जनार्दनोजितामित्रः परार्थैक
प्रयोजनः॥ २५॥ विश्वामित्रप्रियोदांतः
शत्रुजिछत्रुतापनः॥ सर्वज्ञःसर्वदेवादिः
शरण्योवालिमर्दनः॥ ३६॥ ज्ञानभव्योप
रिछेद्योवाग्मीसत्यव्रतःशुचिः॥ ज्ञानग

म्योहृढप्रस्तः खरध्वंसीप्रतापवान् ॥ ३७
कृतिमानात्मवान्वीरो जितक्रोधोरिमर्द
नः ॥ विश्वरूपोविशालाक्षः प्रभुः परिवृ
ढोदृढः ॥ ३८ ॥ ईशः खड्गधरः श्रीमान्कौ
सलेयोनसूयकः ॥ विपुलांसोमहोरस्कः

परमेष्ठीपरायणः ॥ ३९ ॥ सत्यव्रतः सत्यसं
धोगुरुः परमधार्मिकः ॥ लोकज्ञोलोक
बंधुश्चलोकात्मालोककृल्लभुः ॥ ४० ॥ अ
नादिर्भगवान्सेव्योजितमायोरघूद्वहः
रामोदयाकरोदक्षः सर्वज्ञः सर्वपालकः

म·

४१ ॥ ब्रह्मज्ञोनीतिमान्गोप्तासर्वदेवप्रि
योहरिः ॥ सुंदरःपीतवासाश्चसूत्रकारः
पुरातनः ॥ ४२ ॥ सौम्योमहर्षिकोदंडीसर्व
जित्सर्वगोचरः ॥ कविःसुग्रीववरदःसर्वपु १२
ण्याधिकप्रदः ॥ ४३ ॥ भव्योजितारिषड्व

गोमहोदारोघनाशनः ॥ कीर्त्तिरादि
पुरुषःकांतःपुण्यकृतागमः ॥ ४४ ॥ अ
कल्मषश्चतुर्बाहुःसर्वावासोदुरासदः
स्मितभाषीनिवृत्तात्मास्मृतिमान्वीर्य
वान्प्रभुः ॥ ४५ ॥ धीरोदात्तोघनश्यामःस

र्वयुद्धविशारदः॥ अध्यात्मयोगनिलयः
सुमनालक्ष्मणाग्रजः॥ ५६॥ सर्वतीर्थम
यः शूरः सर्वयज्ञफलप्रदः॥ सर्वस्वरूपी
यज्ञेशोजरामरणवर्जितः॥ ५७॥ वर्णा
श्रमगुरुर्वर्णीशत्रुजित्पुरुषोत्तमः॥ शि

स॰ १३

वलिंगप्रतिष्ठानापरमात्मापरावरः ५८
प्रमाणभूतोदुर्ज्ञेयःपूर्णःपरपुरंजयः
अनंतदृष्टिरानंदोधनुर्वेदोधनुर्धरः ५९
गुणाकरोगुणश्रेष्टःसच्चिदानंदविग्रहः
अभिवाद्योमहाकायोविश्वकर्माविशा

रदः ॥ ५० ॥ विनीतात्मावीतरागस्तपस्वी
श्रोजनेश्वरः ॥ कल्याणप्रकृतिः सर्वः सर्वे
शः सर्वकामदः ॥ ५१ ॥ अक्षरः पुरुषः सा
क्षीकेशवः पुरुषोत्तमः ॥ लोकाध्यक्षोम
हाकायोबिभीषणवरप्रदः ॥ ५२ ॥ आनंद

विग्रहोज्योतिर्हनुमत्प्रभुरक्षयः ॥ भ्राजि
ष्णुःसहनोभोक्तासत्यवादीबहुश्रुतः ॥
५३ ॥ सुखदःकारणंकर्त्ताभवबंधनमोच
कः ॥ देवचूडामणिर्नेताब्रह्मण्योब्रह्मव
र्धनः ॥ ५४ ॥ संसारतारकोरामःसर्वज्ञःस्व

विमोकहृत् ॥ विहत्तमोविश्वकर्त्तावि
श्वभर्त्ताचविश्वसृक् ॥ ५५ ॥ नित्योनियत
कल्याणः सीताशोकविनाशकृत् ॥ का
कुत्स्थः पुंडरीकाक्षोविश्वामित्रभयापहः ॥
५६ ॥ मारीचमथनोरामोविराधवधपंडि

तः ॥ दुस्वप्ननाशनोरम्यः किरीटीत्रिद
शाधिपः ॥५७॥ महाधनुर्महाकायोभी
मोभिमपराक्रमः ॥ तत्वस्वरूपीतत्वज्ञ
स्तत्ववादीसुविक्रमः ॥५८॥ भूतात्माभू
तकृत्स्वामीकालज्ञानीमहापटुः ॥ अ

निर्विण्णोगुणग्रामोनिष्कलंकःकलं
कहा॥५९॥स्वभावभद्रःशत्रुघ्नःकेशवः
स्थाणुरीश्वरः॥भूतादिःशंभुरादित्यः
स्थविष्टःशाश्वतोध्रुवः॥६०॥कवचीकुं
डलीचक्रीखड्गीभक्तजनप्रियः॥अम्

स्फूर्जन्मरहितःसर्वजित्सर्वगोचरः ॥ ६१
अनुत्तमोऽप्रमेयात्मासर्वादिर्गुणसाग
रः ॥ समःसमात्मासमगोजदामुकुदमं
डितः ॥ ६२ ॥ अजेयःसर्वभूतात्माविष्व
क्सेनोमहातपाः ॥ लोकाध्यक्षोमहाबा

द्भुरमृतोवेदवित्तमः॥६३॥सहिष्णुःसद्ग
तिःशास्ताविश्वयोनिर्महाद्युतिः॥अ
तींद्रियोजितःप्रांशुरुपेंद्रोवामनोबली
६४॥मधुमत्तोविधाताचब्रह्माविष्णुश्चशं
करः॥हंसोमरीचिर्गोविंदोरत्नगर्भोम

हीपतिः ॥ ६५ ॥ व्यासोवाचस्पतिःसर्वःसु
रासुरनमस्कृतः ॥ जानकीवल्लभःपूज्यःप्र
कटप्रीतिवर्धनः ॥ ६६ ॥ संभवोतींद्रियो
वेद्योनिर्देश्योजांबवत्प्रभुः ॥ मदनोम
न्मथोनाथोविश्वरूपोनिरंजनः ॥ ६७ ॥

स॰

नारायणोग्रणीःसाधुर्जटायुप्रीतिव
र्द्धनः॥ नैकरूपोजगन्नाथःसुरकार्य
हितःप्रभुः॥६८॥ जितक्रोधोजितारा
तिःप्लवंगाधिपराज्यदः॥वसुदःसुभुजो १८
नैकमायीभव्यप्रमोदनः॥६९॥ चंडांशुः

सिद्धिसंकल्पः शरणागतवत्सलः ॥ अ
गदोरोगहर्त्ताचमंत्रविन्मंत्रभावनः ॥
७० ॥ सौमित्रिवत्सलोधुर्योव्यक्ताव्यक्त
स्वरूपधृक् ॥ विशिष्टोग्रामणीःश्रीमान
नुकूलप्रियंवदः ॥ ७१ ॥ अतुलःसात्वि

सिद्धिसंकल्पः शरणागतवत्सलः ॥ अ
गदोरोगहर्त्ता च मंत्रविन्मंत्रभावनः ॥
७० ॥ सौमित्रिवत्सलो धुर्यो व्यक्ताव्यक्त
स्वरूपधृक् ॥ विशिष्टो ग्रामणीः श्रीमान
नुकूलप्रियंवदः ॥ ७१ ॥ अतुलः सात्वि

स॰

क्रोधीरः शरासनविशारदः ॥ ज्येष्ठः सर्व
गुणोपेतः शक्तिमान्तताटकांतकः ॥
७२ ॥ वैकुंठः प्राणिनांप्राणः कमठः कम
लाधिपः ॥ गोवर्धनधरोमत्स्यरूपः कारु १९
ण्यसागरः ॥ ७३ ॥ कुंभकर्णप्रभेत्ताचगो

पीगोपालसंवृतः॥ मायावीस्वापनो
व्यापीरेणुकेयबलापहा॥ ७४॥ पिनाकम
थनोवेद्यःसमर्थोगरुडध्वजः॥ लोकत्रया
श्रयोलोकभर्ताभरताग्रजः॥ ७५॥ श्री
धरःसद्गतिर्लोकसाक्षीनारायणोवि

भुः॥ मनोवेगीमनोरूपीपूर्णःपुरुषपुं
गवः॥७६॥ यदुश्रेष्ठोयदुपतिर्भूतावासः
सुविक्रमः॥ तेजोधराधरोव्यग्रश्चतुर्मूर्त्ति
र्महानिधिः॥७७॥चाणूरमर्दनोवंद्यः
शांतोभरतवंदितः॥ शब्दातिगोगभी

रात्माकोमलांगःप्रजागरः॥७८॥लो
कोर्ध्वगःशेषशायीक्षीराब्धिनिलयोन
लः॥आत्मयोनिरदीनात्मासहस्रार्चिः
सहस्रपात्॥७९॥पर्जन्यःकुमुदोभूता
वासःकमललोचनः॥श्रीवत्सवक्षाःश्री

वासोवीरहालक्ष्मणाग्रजः ॥ ८० ॥ लोका
भिरामोलोकारिमर्दनःसेवकप्रियः ॥ स
नातनतमोमेघश्यामलोराक्षसांतकः ॥
८१ ॥ दिव्यायुधधरःश्रीमानप्रमेयोजि
तेंद्रियः ॥ भूदेववंद्योजनकःप्रियकृत्मपि

स॰ २१

नामहः ॥ ८२ ॥ उत्तमः सात्विकः सत्यः स
त्यसंधस्त्रिविक्रमः ॥ सुव्रतः सुलभः सूक्ष्मः
सुघोषः सुखदः सुखी ॥ ८३ ॥ दामोदरो
ऽच्युतः शार्ङ्गी वामनो मथुराधिपः ॥ सप्तता
लप्रभेत्ता चमित्रवंशप्रवर्धनः ॥ ८४ ॥ देव

कीनंदनःशौरिःशृंगीकैटभमर्दनः॥का
लस्वरूपीकालात्माकालःकल्याणदः
कविः॥८५॥संवत्सरऋतुःपक्षोह्ययनो
दिवसोयुगः॥स्तवोविविक्तोनिर्लेपःस्त
व्योम्व्यापीनिराकुलः॥८६॥अनादिनि

धनः सर्वलोकपूज्यो निराश्रयः ॥ रसोर
सज्ञः सारज्ञः कलासारो रसात्मकः ॥
८७ ॥ सर्वज्ञः ख्यातिगो विद्याराशिः परम
गोचरः ॥ शेषो विशेषो विगतकल्मषो र
घुपुंगवः ॥ ८८ ॥ वर्णश्रेष्ठो वर्णभावो वर्णो

कीनंदनःशौरिःशृंगीकैटभमर्दनः॥का
लस्वरूपीकालात्माकालःकल्याणदः
कविः॥८५॥संवत्सरऋतुःपक्षोह्ययनो
दिवसोयुगः॥स्तवोविविक्तोनिर्लेपःस्त
व्योम्मापीनिराकुलः॥८६॥अनादिनि

धनः सर्वलोकप्रभ्योनिराश्रयः ॥ रसोर
सज्ञः सारज्ञः कलासारोरसात्मकः ॥
८७ ॥ सर्वज्ञः ख्यातिगोविद्याराशिः परम
गोचरः ॥ शेषोविशेषोविगतकल्मषोर
घुपुंगवः ॥ ८८ ॥ वर्णश्रेष्ठोवर्णभावोवर्णो

धनःसर्वलोकपूज्योनिराश्रयः ॥ रसोर
सज्ञःसारज्ञःकलासारोरसात्मकः ॥
९७ ॥ सर्वज्ञःख्यातिगोविद्याराशिःपरम
गोचरः ॥ शेषोविशेषोविगतकल्मषोर
घुपुंगवः ॥ ९८ ॥ वर्णश्रेष्ठोवर्णभावोवर्ण्यो

वर्णगुणेश्वरः ॥ कर्मसाक्षीगुरुश्रेष्ठोदे
वासुरनमस्कृतः ॥ ८९ ॥ देवाधिदेवोदेव
र्षिर्देवासुरवरप्रदः ॥ सर्वदेवमयश्चक्री
शार्ङ्गपाणिरनुत्तमः ॥ ९० ॥ मनोबुद्धिर
हंकारः प्रकृतिः पुरुषोव्ययः ॥ न्यायो

न्यायीनयः श्रीमानजोनगधरोध्रुवः ॥ ११
लक्ष्मीविश्वंभराभर्त्ता देवेंद्रोबालिमर्दनः
बाणारिर्मदनोयज्वानुत्तमोमुनिसेवितः
१२॥ देवाग्रणीः शिवध्यानतत्परः परमे
श्वरः ॥ सामगेयप्रियः क्रूरः पुण्यकीर्त्तिः

स. 

मुलोचनः ॥१३॥ पुण्यःपुण्याधिकःपूर्वः
पूर्णःपुरयितारविः॥जटिलःकल्मष
ध्वांतप्रभंजनयितावसुः॥१४॥ अव्यक्त
लक्षणोव्यक्तोदशास्यद्विपकेसरी॥क
लानिधिःकलारूपःकमलानंदवर्धनः

१५ ॥ अलंकरिष्णुरचलोरोचिष्णुर्विक्र
मोत्तमः ॥ जयोजयारिः संपूर्णः शमनोभ
वभंजनः ॥ १६ ॥ आयुः शब्दः पतिः स्त्रष्टा
गोचरोरंजनोलघुः ॥ निःशब्दःपुरुषोमा
यीस्थूलःसूक्ष्मोविलक्षणः ॥ १७ ॥ आ

त्मयोनिरयोनिश्वसप्तजिह्वः सहस्रपा
त्॥ अमृतांशुर्महागर्तो निवृत्तविषय
स्पृहः ॥ ९८ ॥ त्रिकालज्ञो मुनिः साक्षी वि
हायसगतिः कृती ॥ मनानननतमः स्रग्वी
पेशलो जीविनांवरः ॥ ९९ ॥ शक्तिमानूशं

स॰
२५

खभृन्नाथो गदापद्मरथांगभृत् ॥ निरी
होनिर्विकल्पश्चचिद्रूपोतीतसाध्वसः ॥
१०० ॥ सनातनः सहस्राक्षः शतमूर्तिर्धन
प्रदः ॥ हंसःपुंडरीकशयनः कविनोदद एव
च ॥ १ ॥ सूर्योग्रहपतिः श्रीमान्समर्थोनर्थ

नाशनः॥ अधर्मशत्रुरक्षय्यः पुरुहूतः
पुरुष्टुतः॥२॥ ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्ध
नागमः॥ हिरण्यगर्भो ज्योतिष्मान्सुलला
टः सुविक्रमः॥३॥ शिवपूजापरः श्रीमा
न्भवानीप्रियकृद्धरिः॥ नरोनारायणोरा

मः कपर्दीनीललोहितः ॥४॥ रुद्रः पशुप
तिस्थाणुर्विश्वामित्रोद्विजेश्वरः ॥ माताम
होमातरिश्वाविरिंचोविष्टरश्रवाः ॥५॥ अ
क्षोभ्यः सर्वभूतात्माचंडः सत्यपराक्रमः
वालखिल्योमहाकल्पः कल्पवृक्षः कलाध

स॰

र:॥६॥ निदाघस्तपनोमेघः सत्तंपरबला

पहृत्॥ कबंधमथनोदिव्यः कंबुग्रीवः शि

वप्रियः॥७॥ सुखानिलः सुनिष्पन्नः सुरभिः

शिशिरात्मकः॥ असंस्पृष्टोनिथिःश्वरःप्र

माथीपापनाशकृत्॥८॥ वसुश्रवाःकव्यवा

२७

हःप्रतप्तोविश्वमोचनः ॥ रामोनीलोत्पल
श्यामोवृषस्कंधोमहाद्युतिः ॥ ९ ॥ उत्तार
णोदुष्कृतिहादुर्धर्षोदुःसहोभयः ॥ पवि
त्रपादःपापारिर्मणिपुरोनभोगति ॥ १० ॥
अमृतेशोमृतवपुर्धर्मीधर्मकृपाकरः ॥

भगोविवस्वानादित्योयोगाचार्योदिव
स्पतिः॥११॥उदारकीर्निरुद्योगीवाङ्मयः
सदसन्मयः॥नक्षत्रमालीनाकेशःस्वाधि
ष्ठानषडाश्रयः॥१२॥चतुर्वर्गफलोधर्मी
शक्तित्रयफलंनिधिः॥निदानगर्भोनिर्व्या

म.
२८

ज्ञोनिरीशोव्याजमर्दनः ॥ १३ ॥ श्रीवल्ल
भः शिवारंभः शांतोभद्रः समंजसः ॥ भू
शयीभूतकृत्भू निभूषणोभूतवाहनः ॥ २४
अकायोभक्तकायस्थः कालज्ञानीमहा
पटुः ॥ परार्थवृत्तिरचलोविविक्तः श्रुतिसा

स.

गरः ॥१५॥ स्वभावभद्रोमध्यस्थःसंसारभय
नाशनः ॥ वेद्योवैद्योवियद्गोप्तासर्वामरमु
नीश्वरः ॥१६॥ सुरेंद्रःकरणंकर्मकरःकर्मी २९
ह्यधोक्षजः ॥ ध्येयोग्निधुर्योधात्रीशःसं ३०
कल्पःशर्वरीपतिः ॥१७॥ परमार्थगुरुर्दृष्टिः

शुचिराश्रितवत्सलः ॥ विष्णुर्जिष्णुर्विभु
र्यज्ञोयज्ञेशोयज्ञपालकः ॥ १८ ॥ प्रभवि
ष्णुर्ग्रसिष्णुश्चलोकात्मालोकपालकः
केशवःकेशिहाकाव्यःकविःकारणका
रणं ॥ १९ ॥ काम्यकर्त्ताकलाज्ञोषोवासुदे

वः पुरुष्टुतः ॥ आदिकर्त्ता वराहश्च माधवो

मधुसूदनः ॥ २० ॥ नारायणो नरो हंसो वि

ष्वक्सेनो जनार्दनः ॥ विश्वकर्त्ता महायज्ञो

ज्योतिष्मान्पुरुषोत्तमः ॥ २१ वैकुंठः पुंड

रीकाक्षः कृष्णः सूर्यः सुरार्चितः ॥ नारसिं

स॰

३१

होमहाभीमोवज्रदंष्ट्रोनखायुधः ॥ २२ ॥
आदिदेवोजगत्कर्त्तायोगीशोगरुडध्व
जः ॥ गोविंदोगोपतिर्गोप्तासूपतिर्भुवने
श्वरः ॥ २३ ॥ पद्मनाभोहृषीकेशोधाता
दामोदरःप्रभुः ॥ त्रिविक्रमस्त्रिलोकेशो

ब्रह्मेशप्रीतिवर्द्धनः ॥ २४ ॥ वामनोदुष्टदम
नोगोपींद्रोगोपवल्लभः ॥ भक्तप्रियोच्यु
तःसत्यःसत्यकीर्तिर्धृतिस्मृतिः ॥ २५ ॥ का
रुण्यःकरुणोव्यासःपापहाशांतिवर्द्ध
नः ॥ सन्यासीशास्त्रतत्वज्ञोमंदरोगिरि

स॰
३२

केतनः ॥ २६ ॥ बदरीनिलयः शांतस्तप
स्वीवैद्युतःप्रभुः ॥ भूतावासोगुहावासः
श्रीनिवासः श्रियःपतिः ॥ २७ ॥ तपोवासो
मुदावासःसत्यवासःसनातनः ॥ पुरुषःपु
ष्करःपुण्यःपुष्कराक्षोमहेश्वरः ॥ २८ ॥ पु

स॰

ण्यमूर्तिः पुराणज्ञः पुण्यदः पुण्यकर्द्ध
नः ॥ शंखीचक्रीगदीशार्ङ्गीलांगलीमु
सलीहली ॥ २९ ॥ किरीटीकुंडलीहारीमे
खलीकवचीध्वजी ॥ योद्धाजेतामहावीर्यः २२
शत्रुघ्नः शत्रुतापनः ॥ ३० ॥ शास्तास्वस्तिक

रः शास्त्रः शांतिदः शंकरस्तुतः ॥ सारथिः

सात्विकः स्वामीसामवेदप्रियः समः ॥ ३१ ॥

पावनः साहसः शक्तिः संपूर्णांगः समृद्धि

मान् ॥ स्वर्गदः कामदः श्रीदः कीर्तिदः की

र्तिनायकः ॥ ३२ ॥ मोक्षदः पुंडरीकाक्षः क्षी

स॰

राब्धिकृतकेतनः॥ सर्वात्मासर्वलोकेशः
प्रेरकः पापनाशनः॥ ३३॥ वैकुंठः पुंडरीका
क्षः सर्वदेवनमस्कृतः॥ सर्वव्यापीजगन्ना
थः सर्वलोकमहेश्वरः॥ ३४॥ सर्गास्थित्यंत २४
कृद्देवः सर्वदेवसुखावहः॥ अक्षयः शा

श्वतोनंतः क्षयवृद्धिविवर्जितः ॥ ३५ ॥ नि
र्लेपोनिर्गुणः सूक्ष्मोनिर्विकारोनिरंजनः
सर्वोपाधिविनिर्मुक्तः सत्तामात्रव्यवस्थि
तः ॥ ३६ ॥ अविकारीविभुर्नित्यः परमात्मा
सनातनः ॥ अचलोनिर्मलोव्यापीनित्य

तृप्तोनिराश्रयः॥३७॥श्यामोयुवालोहि
ताक्षोदीप्तास्योमितभाषितः॥आजान
बाहुःसुमुखःसिंहस्कंधोमहाभुजः॥३८
सत्ववान्गुणसंपन्नोदीप्यमानःस्वतेज
सा॥ कालात्माभगवान्कालःकालचक्र

प्रवर्त्तकः ३९ नारायणः परंज्योतिः पर
मात्मासनातनः विश्वेश्वरोविश्वमूर्तिर्वि
श्वात्माविश्वभावनः ५० विश्वभुग्विश्व
सोक्ताचविश्वगोप्ताचशाश्वतः सर्वविश्व
सुहृत्शांतःसर्वभूतानुकंपनः ५१ सर्वेश्व

रेश्वरः सर्वः शर्वश्चाश्रितवत्सलः ॥ सर्वगः
सर्वभूतेशः सर्वभूताशयास्थितः ॥ ५२ ॥ अ
भ्यंतरस्यतमसः छेत्ता नारायणः परः ॥ अ
नादिनिधनः स्रष्टा प्रजापतिपतिर्हरिः ॥
५३ नारसिंहो हृषीकेशः सर्वात्मा सर्वदृग्व

श्री जगतस्तस्थुषश्चैवप्रभुर्ब्रह्मासनातन
नः ॥ ४४ ॥ कर्त्ताधाताविधाताचसर्वेषांपति
रीश्वरः ॥ सहस्रमूर्द्धाविश्वात्माविष्णुर्विश्व
दृगव्ययः ॥ ४५ ॥ पुराणपुरुषःस्त्रष्टासह
स्त्राक्षःसहस्त्रपात् ॥ तत्वंनारायणोविष्णु

४८ ॥ अकारवाच्योभगवान्भूर्लीलाप(वि)
ति:प्रभु:॥ सर्वलोकेश्वर:श्रीमान्सर्वज्ञ:
सर्वतोमुख:॥ ४९ ॥ स्वामीसुशील:सुलभ:
सर्वज्ञ:सर्वशक्तिमान् ॥ नित्य:संपूर्णका
मश्चनैसर्गिकसुहृत्सुधी:॥ ५० ॥ कृपापीयू

४८॥अकारवाच्योभगवान्विभूर्लीलाप
ति:प्रभुः॥सर्वलोकेश्वरःश्रीमान्सर्वज्ञः
सर्वतोमुखः॥४९॥स्वामीसुशीलःसुलभः
सर्वज्ञःसर्वशक्तिमान्॥नित्यःसंपूर्णका
मश्चनैसर्गिकसुहृत्सुधीः॥५०॥कृपापीयू

षजलधिः शरण्यः सर्वदेहिनां ॥ श्रीमा
न्नारायणः स्वामीजगतांप्रभुरीश्वरः ५१
श्रीशः शरण्योभूतानांसंश्रिताभीष्टदा
यकः ॥ अनंतः श्रीपतीरामोगुणभृन्नि
र्गुणोमहान् ॥ ५२ ॥ एवमादीनिनामानि

स०

७९

संस्मात्तानिपुराणेत्व ॥ उक्तानितवपुत्रेण
विघ्नराजेनधीमता ॥ ५३ ॥ सनत्कुमाराय
पुरातान्युक्तानिमयानघे ॥ एकैकंनाम
रामस्यसर्वपापप्रणाशनं ॥ ५४ ॥ सहस्त्र
नामफलदंसर्वैश्वर्यप्रदायकं ॥ सर्वसिद्धि

सं०

प्रदं नृणां भुक्तिमुक्तिफलप्रदं ॥ ५५ ॥ मंत्रात्म ल
कमिदं सर्वमाख्यातं सर्वमंगलं ॥ यः पठेत्
शृणुयाद्वापि स तु ब्रह्मपदं लभेत् ॥ ५६ ॥ ताव ३९
देवमदस्तेषां महापातकदंतिनां ॥ याव
न्न श्रूयते रामनामपंचाननध्वनिः ॥ ५७ ॥

ब्रह्मघ्नश्चसुरापश्चस्तेयीचगुरुतल्पगः श
रणागतघातीचमित्रविश्वासघातकः ५८
मातृहापितृहाचैवभ्रूणहावीरहातथा को
टिकोटिसहस्राणिह्युपपापानियान्यपि ५९
संवत्सरंक्रमाज्जप्त्वाप्रत्यहंरामसंनिधौ

निष्कल्मषः सुखं भुक्त्वा ततो मोक्षमवाप्नु
यात् ॥ ६० ॥ पार्वत्युवाच ॥ केनोपायेन लघुना
रामनामसहस्रकं ॥ पठ्यते पंडितैर्नित्यं श्रो
तुमिच्छाम्यहं प्रभो ॥ ६१ ॥ श्रीमहादेव उवाच ॥
रामरामेति रामेति रमे रामे मनोरमे ॥ सहस्र

नामतत्तुल्यंश्रीरामनामवरानने ६२ मा
तारामोमत्पितारामचंद्रःस्वामीरामोम
त्सखारामचंद्रः सर्वस्वंमेरामचंद्रोदयालु
र्नान्यंजानेनैवजानेनजाने ॥ ६३ ॥ इति
श्रीलिंगपुराणेउमामहेश्वरसंवादेश्री

